# श्री धर्मशास्तास्तोत्रं

श्रीभारतीतीर्थ-महास्वामिविरचितं

जगत्प्रतिष्ठाहेतुर्यः धर्मः श्रुत्यंतकीर्तितः ।
तस्याऽपि शास्ता यो देवः तं सदा समुपाश्रये ॥1॥

श्रीशंकरार्यैर्हि शिवावतारैः
धर्मप्रचाराय समस्तकाले ।
सुस्थापितं शृंगमहीध्रवर्ये
पीठं यतींद्राः परिभूषयंति ॥2॥

तेष्वेव कर्मंदिवरेषु विद्या-
तपोधनेषु प्रथितानुभावः ।
विद्यासुतीर्थोऽभिनवोऽद्य योगी
शास्तारमालोकयितुं प्रतस्थे ॥3॥

धर्मस्य गोप्ता यतिपुंगवोऽयं
धर्मस्य शास्तारमवैक्षतेति ।
युक्तं तदेतद्ध्युभयोस्तयोर्हि
सम्मेलनं लोकहिताय नूनं ॥4॥

कालेऽस्मिन् कलिमलदूषितेऽपि धर्मः
श्रौतोऽयं न खलु विलोपमाप तत्र ।
हेतुः खल्वयमिह नूनमेव नाऽन्यः
शास्ताऽस्ते सकलजनैकवंद्यपादः ॥5॥

ज्ञानं षडास्यवरतातकृपैकलभ्यं
मोक्षस्तु तार्क्ष्यवरवाहदयैकलभ्यः ।
ज्ञानं च मोक्ष उभयं तु विना श्रमेण
प्राप्यं जनैः हरिहरात्मजसत्प्रसादात् ॥6॥

यमनियमादिसमेतैः यतचित्तैर्योगिभिः सदा ध्येयं ।
शास्तारं हृदि कलये धातारं सर्वलोकस्य ॥7॥

शबरगिरिनिवासः सर्वलोकैकपूज्यः
नतजनसुखकारी नम्रहृत्तापहारी ।
त्रिदशदितिजसेव्यः स्वर्गमोक्षप्रदाता
हरिहरसुतदेवः संततं शं तनोतु ॥8॥

इति दक्षिणाम्नाय-श्री-शृंगेरी-शारदा-पीठाधीश्वर-
जगद्गुरुशंकराचार्य-अनंतश्रीविभूषित-श्रीभारतीतीर्थ-
महास्वामिविरचित-धर्मशास्ता-स्तोत्रं संपूर्णं ।